॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

पञ्चमकाण्डे तृतीयः प्रश्नः

चितीनां निरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

उथ्सन्नयज्ञो वा एष यदग्निः किव्वाऽहैतस्य क्रियते किव्वा न यद् व यज्ञस्य क्रियमाणस्या-
न्तर्यन्ति पूयति वा अस्य तदाश्विनीरुप दधात्यश्विनौ वै देवानाम्भिषजौ ताभ्यामेवास्मै भेष-
जङ्करोति पञ्चोप दधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्मै भेषजङ्करोत्यृतव्या उप दधात्यृतूना-
ङ्क्लृप्त्यै ॥ [१] ॥ पञ्चोप दधाति पञ्च वा ऋतवो यावन्त एवर्तवस्तान् कल्पयति समानप्रभृ-
तयो भवन्ति समानोदर्कास्तस्माथ् समाना ऋतव एकेन पदेन व्यावर्तन्ते तस्मादृतवो व्यावर्तन्ते
प्राणभृत उप दधात्यृतुष्वेव प्राणान् दधाति तस्माथ् समानाः सन्त ऋतवो न जीर्यन्त्यथो प्र
जनयत्येवैनानेष वै वायुर् यत् प्राणो यदृतव्या उपधाय प्राणभृत ॥ [२] ॥ उपदधाति तस्माथ्
सर्वानृतूननु वायुरा वरीवर्ति वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे यदेकधोपदद्ध्यादेकमृतुव्वँ-
र्षेदनुपरिहारꣳ सादयति तस्माथ् सर्वानृतून्वर्षति यत् प्राणभृत उपधाय वृष्टिसनीरुपदधाति
तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते पशवो वै वयस्या नानामनसः खलु वै पशवो नानाव्रतास्तेऽप
एवाभि समनसो ॥ [३] ॥ यङ्कामयेतापशुः स्यादिति वयस्यास्तस्योपधायापस्या उप दद्ध्या-
दसंज्ञानमेवास्मै पशुभिः करोत्यपशुरेव भवति यङ्कामयेत पशुमान्थ्स्यादित्यपस्यास्तस्योपधाय
वयस्या उप दद्ध्याथ् संज्ञानमेवास्मै पशुभिः करोति पशुमानेव भवति चतस्रः पुरस्तादुप दधाति
तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे ॥ [४] ॥ मूर्द्धन्वतीर् भवन्ति तस्मात् पुर-
स्तान्मूर्द्धा पञ्च दक्षिणायाꣳ श्रोण्यामुप दधाति पञ्चोत्तरस्यान्तस्मात् पश्चाद्वर्षीयान् पुरस्ता-

त्प्रवणः प॒शुर् ब॒स्तो वय॒ इति॑ द॒क्षि॒णेऽꣳस॒ उप॑ दधाति वृ॒ष्णिर् वय॒ इत्यु॒त्तरेऽꣳसा॑वे॒व प्रति॑
दधाति व्या॒घ्रो वय॒ इति॑ द॒क्षिणे॑ प॒क्ष उप॑ दधाति सि॒ꣳ॒हो वय॒ इत्यु॒त्तरे॑ प॒क्षयो॑रे॒व वी॒र्य॑न्दधाति॒
पुरु॑षो॒ वय॒ इति॒ मद्ध्ये॒ तस्मा॒त् पुरु॑षः प॒शू॒नामधि॑पतिः ॥ [५] ॥

(क्लृ॒प्त्या॑ उ॒पधा॒र्य॑ प्रा॒ण॒भृ॒तः॒ सम॑नसः कृ॒ष्णे पुरु॑षो॒ वय॒ इति॒ पञ्च॑ च) ॥ १ ॥

इन्द्रा᳚ग्नी॒ अव्य॑थमाना॒मिति॑ स्वयमातृ॒ण्णामुप॑ दधातीन्द्रा॒ग्निभ्या॒ँव्वा इ॒मौ लो॒कौ विधृ॑ताव॒-
नयो᳚र् लो॒कयो॒र् विधृ॑त्या॒ अधृ॑तेव॒ वा ए॒षा यन्म॑द्ध्य॒मा चिति॑र॒न्तरि॑क्षमिव॒ वा ए॒षेन्द्रा᳚ग्नी॒
इत्या॑हेन्द्रा॒ग्नी वै दे॒वाना॑मोजो॒भृता॒वोज॑सै॒वैना॑म॒न्तरि॑क्षे चिनुते॒ धृत्यै᳚ स्वयमातृ॒ण्णामुप॑ दधात्य॒-
न्तरि॑क्ष॒ँव्वै स्व॑यमातृ॒ण्णाऽन्तरि॑क्षमे॒वोप॑ ध॒त्तेऽश्व॒मुप॑ ॥ [६] ॥ घ्रापयति प्रा॒णमे॒वास्या᳚न्द॒-
धा॒त्यथो᳚ प्राजाप॒त्यो वा अश्वः॑ प्र॒जाप॑तिनै॒वाग्निञ्चि॑नुते स्वयमातृ॒ण्णा भ॑वति प्रा॒णाना॒मुथ्सृ॑ष्ट्या॒
अथो॑ सुव॒र्गस्य॑ लो॒कस्यानु॑ख्यात्यै दे॒वाना॒ँव्वै सु॑व॒र्गँल्लो॒कय्ँय॒तान्दिशः॒ सम॑व्लीयन्त॒ त ए॒ता दि॒श्या॑
अप॑श्य॒न् ता उपा॑दधत॒ ताभि॒र् वै ते दिशो॑ऽदृꣳह॒न्॒यद् दि॒श्या॑ उ॒पदधा॑ति दि॒शाँव्विधृ॑त्यै॒ दश॑
प्रा॒ण॒भृतः॑ पु॒रस्ता॒दुप॑ ॥ [७] ॥ दधाति॒ नव॒ वै पुरु॑षे प्रा॒णा नाभि॑र् द॒शमी॑ प्रा॒णाने॒व पु॒रस्ता᳚-
द्ध॒त्ते तस्मा᳚त् पु॒रस्ता᳚त् प्रा॒णा ज्योति॑ष्मतीमुत्त॒मामुप॑ दधाति॒ तस्मा᳚त् प्रा॒णाना॒ँव्वाग् ज्योति॑रुत्त॒मा
दशोप॑ दधाति द॒शाक्ष॑रा वि॒राड् वि॒राट् छन्द॑सा॒ञ्ज्योति॒र् ज्योति॑रे॒व पु॒रस्ता᳚द्ध॒त्ते तस्मा᳚त् पु॒रस्ता॒-
ज्ज्योति॒रुपा᳚ऽऽस्म॒हे छन्दा॑ꣳसि प॒शुष्वा॒जिम॑यु॒स्तान् बृ॒ह॒त्यु॒द॑जय॒त् तस्मा॒द्बार्॒हताः ॥ [८] ॥
प॒शव॑ उच्यन्ते॒ मा छन्द॒ इति॑ द॒क्षिण॒त उप॑ दधाति॒ तस्मा᳚द्द॒क्षि॒णावृ॑तो॒ मासाः᳚ पृ॒थि॒वी छन्द॒ इति॑
प॒श्चात् प्रति॑ष्ठित्या अ॒ग्निर् दे॒वतेत्यु॑त्त॒रत॒ ओजो॒ वा अ॒ग्निरोज॑ ए॒वोत्त॑र॒तो ध॑त्ते॒ तस्मा॑दुत्तरतोऽभि-
प्र॒या॒यी ज॑यति॒ षट्त्रिꣳ॑श॒थ् सम्प॑द्यन्ते॒ षट्त्रिꣳ॑शदक्षरा बृह॒ती बार्॒हताः प॒शवो॑ बृह॒त्यैवास्मै॑ प॒शूनव॑
रुन्धे बृह॒ती छन्द॑सा॒ꣳ॒ स्वारा᳚ज्य॒म्परी॑याय॒ यस्यै॒ता ॥ [९] ॥ उ॑पधी॒यन्ते॒ गच्छ॑ति॒ स्वारा᳚ज्यꣳ
स॒प्त वा॑लखि॒ल्याः पु॒रस्ता॒दुप॑ दधाति स॒प्त प॒श्चाथ् स॒प्त वै शी॑र्॒षण्याः᳚ प्रा॒णा द्वाव॒वाञ्चौ᳚ प्रा॒णाना॑ꣳ
सवीर्य॒त्वाय॑ मू॒र्द्धाऽसि॒ राडिति॑ पु॒रस्ता॒दुप॑ दधाति य॒न्त्री राडिति॑ प॒श्चात् प्रा॒णाने॒वास्मै॑ स॒मीचो॑
दधाति ॥ [१०] ॥

(अ॒श्वमुप॑ पु॒रस्ता॒दुप॒बार्॒हता॒ ए॒ताश्च॒तु॑स्त्रिꣳशच्च) ॥ २ ॥

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता अक्ष्णयास्तोमीया अपश्यन् ता अन्यथाऽनूच्यान्यथोपादधत तदसुरा नान्ववायन् ततो देवा अभवन् पराऽसुरा यदक्ष्णयास्तोमीया मीया अन्यथाऽनूच्यान्यथोपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्याशु स्त्रिवृदिति पुरस्तादुप दधाति यज्ञमुखव्वै त्रिवृ ॥ [११] ॥ द्यज्ञमुखमेव पुरस्ताद् वि यातयति व्योम सप्तदश इति दक्षिणतोऽन्नव्वै व्योमान्नꣳ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते धरुण एकविꣳश इति पश्चात् प्रतिष्ठा वा एकविꣳशः प्रतिष्ठित्यै भान्तः पञ्चदश इत्युत्तरत ओजो वै भान्त ओजः पञ्चदश ओज एवोत्तरतो धत्ते तस्मादुत्तरतोऽभिप्रयायी जयति प्रतूर्तिरष्टादश इति पुरस्ता ॥ [१२] ॥ दुप दधाति द्वौ त्रिवृतावभिपूर्वय्यँज्ञमुखे वि यातयत्यभिवर्तः सविꣳश इति दक्षिणतोऽन्नव्वा अभिवर्तोऽन्नꣳ सविꣳशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते वर्चो द्वाविꣳश इति पश्चाद्यद्विꣳशतिर् द्वे तेन विराजौ यद् द्वे प्रतिष्ठा तेन विराजोरेवाभिपूर्वमन्नाद्ये प्रति तिष्ठति तपो नवदश इत्युत्तरत स्तस्माथ् सव्यो ॥ [१३] ॥ हस्तयोस्तपस्वितरो योनिश्चतुर्विꣳश इति पुरस्तादुप दधाति चतुर्विꣳशत्यक्षरा गायत्री गायत्री यज्ञमुखय्यँज्ञमुखमेव पुरस्ताद्वि यातयति गर्भाः पञ्चविꣳश इति दक्षिणतोऽन्नव्वै गर्भा अन्नम्पञ्चविꣳशोऽन्नमेव दक्षिणतो धत्ते तस्माद् दक्षिणेनान्नमद्यत ओजस्त्रिणव इति पश्चादिमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठति संभरणस्त्रयोविꣳश इत्यु ॥ [१४] ॥ त्तरतस्तस्माथ् सव्यो हस्तयोः संभार्यतरः क्रतुरेकत्रिꣳश इति पुरस्तादुप दधाति वाग्वै क्रतुर् यज्ञमुखव्वाग्यज्ञमुखमेव पुरस्ताद्वि यातयति ब्रध्नस्य विष्टपञ्चतुस्त्रिꣳश इति दक्षिणतोऽसौ वा आदित्यो ब्रध्नस्य विष्टपम्ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद् दक्षिणोऽर्द्धो ब्रह्मवर्चसितरः प्रतिष्ठा त्रयस्त्रिꣳश इति पश्चात् प्रतिष्ठित्यै नाकः षट्त्रिꣳश इत्युत्तरतः सुवर्गो वै लोको नाकः सुवर्गस्य लोकस्य समष्ट्यै ॥ [१५] ॥

(वै त्रिवृ दिति पुरस्ताथ् सव्य स्त्रयोविꣳश इति सुवर्गो वै पञ्च च) ॥ ३ ॥

अनुवाक ३ विशेषः (आशुर् व्योम धरुणो भान्तः प्रतूर्तिर भिवर्तो वर्च स्तपो योनिर् गर्भा ओजः संभरणः क्रतुर् ब्रध्नस्य प्रतिष्ठा नाकः षोडश)

अ॒ग्नेर् भा॒गो॑ऽसीति॑ पु॒रस्ता॒दुप॑ दधाति यज्ञमु॒खँव्वा अ॒ग्निर् य॑ज्ञमु॒खन्दी॒क्षा य॑ज्ञमु॒खम्ब्रह्म॑ यज्ञमु॒खन्त्रि॒वृद्य॑ज्ञमु॒खमे॒व पु॒रस्ता॒द्वि या॑तयति नृ॒चक्ष॑साम्भा॒गो॑ऽसीति॑ द॒क्षि॒ण॒तः शु॒श्रु॒वाꣳसो॒ वै नृ॒चक्ष॑सोऽन्न॒न्धा॒ता जा॒ता॒यै॒वास्मा॒ अन्न॒मपि॑ दधाति॒ तस्मा॑ज्जा॒तो ऽन्न॑मत्ति ज॒नि॒त्रꣳ स्पृ॒तꣳ स॑प्तद॒शः स्तोम॒ इत्या॒हाऽन्नँ॒व्वै ज॒नित्र॒ ॥ [१६] ॥ मन्न॑ꣳ सप्तद॒शोऽन्न॑मे॒व द॑क्षिण॒तो ध॑त्ते॒ तस्मा॒द् दक्षि॑णे॒नान्न॑मद्यते मि॒त्रस्य॑ भा॒गो॑ऽसीति॑ प॒श्चात् प्रा॒णो वै मि॒त्रो॑ऽपा॒नो वरु॑णः प्राणापा॒नावे॒वास्मि॑न् दधाति दि॒वो वृ॒ष्टिर् वाता॑ः स्पृ॒ता ए॑कवि॒ꣳशः स्तोम॒ इत्या॑ह प्रति॒ष्ठा वा ए॑कवि॒ꣳशः प्रति॑ष्ठित्या॒ इन्द्र॑स्य भा॒गो॑ऽसीत्यु॑त्तर॒त ओजो॒ वा इन्द्र॒ ओजो॒ विष्णु॒रोज॑ः क्ष॒त्रमोज॑ः पञ्च॒द॒श ॥ [१७] ॥ ओज॑ ए॒वोत्त॑र॒तो ध॑त्ते॒ तस्मा॑दुत्तर॒तोऽभिप्रया॒यी ज॑यति॒ वसू॑नाम्भा॒गो॑ऽसीति॑ पु॒रस्ता॒दुप॑ दधाति यज्ञमु॒खँव्वै वस॑वो यज्ञमु॒खꣳ रु॒द्रा य॑ज्ञमु॒खञ्च॑तुर्वि॒ꣳशो य॑ज्ञमु॒खमे॒व पु॒रस्ता॒द्वि या॑तय त्यादि॒त्याना॑म्भा॒गो॑ऽसीति॑ द॒क्षि॒ण॒तोऽन्नँ॒व्वा आ॑दि॒त्या अन्न॑म्म॒रुतो॒ऽन्नङ्ग॒र्भा॒ अन्न॑म्पञ्चवि॒ꣳशोऽन्न॑मे॒व द॑क्षिण॒तो ध॑त्ते॒ तस्मा॒द् दक्षि॑णे॒नान्न॑मद्यते॒ऽदि॑त्यै भा॒गो॑ ॥ [१८] ॥ ऽसीति॑ प॒श्चात् प्रति॒ष्ठा वा अदि॑तिः प्रति॒ष्ठा पू॒षा प्र॑ति॒ष्ठा त्रि॑ण॒वः प्रति॑ष्ठित्यै दे॒वस्य॑ सवि॒तुर् भा॒गो॑ऽसीत्यु॒त्त॒र॒तो ब्रह्म॒ वै दे॒वः स॑वि॒ता ब्रह्म॒ बृ॒ह॒स्पति॒र् ब्रह्म॑ चतुष्टो॒मो ब्र॑ह्मवर्च॒सम॑े॒वोत्त॑र॒तो ध॑त्ते॒ तस्मा॑दुत्त॒रो॒ऽर्द्धो॑ ब्रह्मवर्च॒सित॑रः सावि॒त्रव॑ती भवति॒ प्रसू॑त्यै॒ तस्मा॑द् ब्राह्म॒णाना॒मुदी॑ची स॒निः प्रसू॑ता ध॒र्त्र॒श्च॑तुष्टो॒म इति॑ पु॒रस्ता॒दुप॑ दधाति यज्ञमु॒खँव्वै ध॒र्त्रो ॥ [१९] ॥ य॑ज्ञमु॒खञ्च॑तुष्टो॒मो य॑ज्ञमु॒खमे॒व पु॒रस्ता॒द्वि या॑तयति॒ यावा॑नाम्भा॒गो॑ऽसीति॑ द॒क्षि॒ण॒तो मासा॒ वै यावा॑ अर्द्धमा॒सा अया॑वा॒स्तस्मा॑द्द॒क्षि॒णावृ॑तो॒ मासा॒ अन्नँ॒व्वै यावा॒ अन्न॑म्प्र॒जा अन्न॑मे॒व द॑क्षिण॒तो ध॑त्ते॒ तस्मा॒द् दक्षि॑णे॒नान्न॑मद्यत ऋ॒भू॒णाम्भा॒गो॑ऽसीति॑ प॒श्चात् प्रति॑ष्ठित्यै विव॒र्तो॑ऽष्टाचत्वारि॒ꣳश इत्यु॑त्तर॒तो॑ऽनयो॒र् लो॒कयो॑ः सवी॒र्य॒त्वाय॒ तस्मा॑दि॒मौ लो॒कौ स॒माव॑द्वीर्यौ॒ ॥ [२०] ॥ यस्य॒ मुख्य॑वतीः पु॒रस्ता॑दुपधी॒यन्ते॒ मुख्य॑ ए॒व भ॑व॒त्याऽस्य॒ मुख्यो॑ जायते॒ यस्यान्न॑वती॒र् द॒क्षि॒ण॒तोऽत्त्यन्न॒माऽस्या॑न्ना॒दो जाय॑ते॒ यस्य॑ प्रति॒ष्ठाव॑तीः प॒श्चात् प्रत्ये॒व ति॑ष्ठति॒ यस्यौज॑स्वतीरुत्तर॒त ओ॑ज॒स्व्ये॑व भ॑व॒त्याऽस्यौ॒जस्वी॒ जाय॑ते॒ऽर्को वा ए॒ष यद॒ग्निस्तस्यै॒तदे॒व स्तो॒त्रमे॒तच्छ॒स्त्रँय्यदे॒षा वि॒धा ॥ [२१] ॥ वि॒धी॒यते॒ऽर्क ए॒व तद॒र्क्य॑मनु॒ वि धी॑यते॒ऽत्त्यन्न॒माऽस्या॑न्ना॒दो जाय॑ते॒ यस्यै॒षा वि॒धा वि॑धी॒यते॒ य उ॑ चैना॒मेवँ॒व्वेद॒ सृष्टी॒रुप॑ दधाति यथासृ॒ष्टमे॒वाव॑ रुन्धे॒ न वा इ॒दन्दिवा॒ न नक्त॑मासी॒दव्या॑वृत्त॒न्ते दे॒वा ए॒ता व्यु॑ष्टीर-

पश्यन् ता उपादधत ततो वा इदव्ँव्यौच्छद्यस्यैता उपधीयन्ते व्येवास्मा उच्छत्यथो तम एवाप हते ॥ [२२] ॥

(वै जनित्रं पञ्चदशो ऽदित्यै भागो वै धर्त्रः समावद्वीर्यौ विधा ततो वा इदं चतुर्दश च) ॥ ४ ॥

अनुवाक ४ विशेषः (अग्नेर् नृचक्षसाञ्जनित्रं मित्र स्येन्द्रस्य वसूना मादित्याना मदित्यै देवस्य सवितुः सावित्रवती धर्त्रो यावानामृभूणाव्विँवर्त श्चतुर्दश)

अग्ने जातान् प्र णुदा नः सपत्नानिति पुरस्तादुप दधाति जातानेव भ्रातृव्यान् प्र णुदते सहसा जातानिति पश्चाज्जनिष्यमाणानेव प्रति नुदते चतुश्चत्वारिꣳशः स्तोम इति दक्षिणतो ब्रह्मवर्चसव्ँवै चतुश्चत्वारिꣳशो ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद् दक्षिणोऽर्द्धो ब्रह्मवर्चसितरः षोडशः स्तोम इत्युत्तरत ओजो वै षोडश ओज एवोत्तरतो धत्ते तस्मा ॥ [२३] ॥ दुत्तरतोऽभिप्रयायी जयति वज्रो वै चतुश्चत्वारिꣳशो वज्रः षोडशो यदेते इष्टके उपदधाति जाताꣳश्चैव जनिष्यमाणाꣳश्च भ्रातृव्यान् प्रणुद्य वज्रमनु प्र हरति स्तृत्यै पुरीषवतीम्मद्ध्य उप दधाति पुरीषव्ँवै मद्ध्यमात्मनः सात्मानमेवाग्निञ्चिनुते सात्माऽमुष्मिँल्लोके भवति य एवव्ँवेदैता वा असपत्ना नामेष्टका यस्यैता उपधीयन्ते ॥ [२४] ॥ नास्य सपत्नो भवति पशुर् वा एष यदग्निर् विराज उत्तमायाञ्चित्यामुप दधाति विराजमेवोत्तमां पशुषु दधाति तस्मात् पशुमानुत्तमाव्ँवाचव्ँवदति दशदशोप दधाति सवीर्यत्वायाऽक्ष्णयोप दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै यानि वै छन्दाꣳसि सुवर्ग्याण्यासन् तैर् देवाः सुवर्गँल्लोकमायन् तेनर्षयो ॥ [२५] ॥ ऽश्राम्यन् ते तपोऽतप्यन्त तानि तपसाऽपश्यन् तेभ्य एता इष्टका निरमिमतेव श्छन्दो वरिवश्छन्द इति ता उपादधत ताभिर् वै ते सुवर्गँल्लोकमायन्यदेता इष्टका उपदधाति यान्येव छन्दाꣳसि सुवर्ग्याणि तैरेव यजमानः सुवर्गँल्लोकमेति यज्ञेन वै प्रजापतिः प्रजा असृजत ताः स्तोमभागैरेवासृजत यथ् ॥ [२६] ॥ स्तोमभागा उपदधाति प्रजा एव तद्यजमानः सृजते बृहस्पतिर् वा एतद्यज्ञस्य तेजः समभरद्यथ् स्तोमभागा यथ् स्तोमभागा उपदधाति सतेजसमेवाग्निञ्चिनुते बृहस्पतिर् वा एताय्ँयज्ञस्य प्रतिष्ठामपश्यद्यथ् स्तोमभागा यथ् स्तोमभागा उपदधाति यज्ञस्य प्रतिष्ठित्यै सप्तसप्तोप दधाति सवीर्यत्वाय तिस्रो मद्ध्ये प्रतिष्ठित्यै ॥ [२७] ॥

(उत्तरतो धत्ते तस्मा दुपधीयन्त ऋषयो ऽसृजत यत् त्रिचत्वारिंशच्च) ॥ ५ ॥

रश्मिरित्येवाऽऽदित्यमसृजत प्रेतिरिति धर्ममन्वितिरिति दिवꣳ सन्धिरित्यन्तरिक्षम्प्रतिधिरिति पृथिवीँविष्टंभ इति वृष्टिम्प्रवेत्यहरनुवेति रात्रिमुशिगिति वसून् प्रकेत इति रुद्रान्थ् सुदीतिरित्यादित्यानोज इति पितॄꣳस्तन्तुरिति प्रजाः पृतनाषाडिति पशून् रेवदित्योषधीरभिजिदसि युक्तग्रावे ॥ [२८] ॥ न्द्राय त्वेन्द्रञ्जिन्वेत्येव दक्षिणतो वज्रम्पर्यौहदभिजित्यै ताः प्रजा अपप्राणा असृजत तास्वधिपतिरसीत्येव प्राणमदधाद्यन्तेत्यपानꣳ सꣳसर्प इति चक्षुर् वयोधा इति श्रोत्रन्ताः प्रजाः प्राणतीरपानतीः पश्यन्तीः शृण्वतीर् न मिथुनी अभवन् तासु त्रिवृदसीत्येव मिथुनमदधात् ताः प्रजा मिथुनी ॥ [२९] ॥ भवन्तीर् न प्राजायन्त ताः सꣳरोहोऽसि नीरोहोऽसीत्येव प्राजनयत् ताः प्रजाः प्रजाता न प्रत्यतिष्ठन् ता वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीत्येवैषु लोकेषु प्रत्यस्थापयद् यदाह वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीति प्रजा एव प्रजाता एषु लोकेषु प्रति ष्ठापयति सात्माऽन्तरिक्षꣳ रोहति सप्राणोऽमुष्मिँल्लोके प्रति तिष्ठत्यव्यर्द्धुकः प्राणापानाभ्याम्भवति य एवँवेद ॥ [३०] ॥

(युक्तग्रावाप्रजा मिथुन्यन्तरिक्षंद्वादश च) ॥ ६ ॥

नाकसद्भिर् वै देवाः सुवर्गँल्लोकमायन् तन्नाकसदान्नाकसत्त्वयँयन्नाकसद उपदधाति नाकसद्भिरेव तद्यजमानः सुवर्गँल्लोकमेति सुवर्गो वै लोको नाको यस्यैता उपधीयन्ते नास्मा अकम्भवति यजमानायतनँवै नाकसदो यन्नाकसद उपदधात्यायतनमेव तद्यजमानः कुरुते पृष्ठानाँवा एतत् तेजः संभृतयँयन्नाकसदो यन्नाकसद ॥ [३१] ॥ उपदधाति पृष्ठानामेव तेजोऽव रुन्धे पञ्चचोडा उप दधात्यफ्सरस एवैनमेता भूता अमुष्मिँल्लोक उप शेरेऽथो तनूपानीरेवैता यजमानस्य यन्द्विष्यात् तमुपदधद्ध्यायेदेताभ्य एवैनन्देवताभ्य आ वृश्चति ताजगार्तिमार्च्छत्युत्तरा नाकसद्भ्य उप दधाति यथा जायामानीय गृहेषु निषादयति तादृगेव तत् ॥ [३२] ॥ पश्चात् प्राचीमुत्तमामुप दधाति तस्मात् पश्चात् प्राची पत्न्यन्वास्ते स्वयमातृण्णाञ्च विकर्णीञ्चोत्तमे उप

दधाति प्राणो वै स्वयमातृण्णाऽऽयुर् विकर्णी प्राणञ्चैवाऽऽयुश्च प्राणानामुत्तमौ धत्ते तस्मात् प्राणश्चाऽऽयुश्च प्राणानामुत्तमौ नान्यामुत्तरामिष्टकामुप दद्ध्याद्यदन्यामुत्तरामिष्टकामुपदद्ध्यात् पशूनां ॥ [३३] ॥ च यजमानस्य च प्राणञ्चाऽऽयुश्चापि दद्ध्यात् तस्मान्ना न्योत्तरेष्टकोपधेया स्वयमातृण्णामुप दधात्यसौ वै स्वयमातृण्णाऽमूमेवोप धत्तेऽश्वमुप घ्रापयति प्राणमेवास्यान्द-धात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निञ्चिनुते स्वयमातृण्णा भवति प्राणानामुथ्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्या एषा वै देवानाव्विक्रान्तिर् यद्विकर्णी यद्विकर्णीमुपदधाति देवानामेव विक्रान्तिमनु वि क्रमत उत्तरत उप दधाति तस्मादुत्तरतौपचारोऽग्निर् वायुमती भवति समिद्ध्यै ॥ [३४] ॥

(संभृतय्यँन्नाकसदो यन्नाकसद स्तत् पशूना मेषा वै द्वाविंशतिश्च) ॥ ७ ॥

छन्दाꣳस्युप दधाति पशवो वै छन्दाꣳसि पशूनेवाव रुन्धे छन्दाꣳसि वै देवानाव्वाममप-शवो वाममेव पशूनव रुन्ध एताꣳ ह वै यज्ञसेनश्चैत्रियायणश्चितिंव्विदाञ्चकार तया वै स पशू-नवारुन्ध यदेतामुपदधाति पशूनेवाव रुन्धे गायत्रीः पुरस्तादुप दधाति तेजो वै गायत्री तेज एव ॥ [३५] ॥ मुखतो धत्ते मूर्द्धन्वतीर् भवन्ति मूर्द्धानमेवैनꣳ समानानाङ्करोति त्रिष्टुभ उप दधातीन्द्रियव्वै त्रिष्टुगिन्द्रियमेव मद्ध्यतो धत्ते जगतीरुप दधाति जागता वै पशवः पशूनेवाव रुन्धेऽनुष्टुभ उप दधाति प्राणा वा अनुष्टुप् प्राणानामुथ्सृष्ट्यै बृहतीरुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरिति विषुरूपाणि छन्दाꣳस्युप दधाति विषुरूपा वै पशवः पशवः ॥ [३६] ॥ छन्दाꣳसि विषु-रूपानेव पशूनव रुन्धे विषुरूपमस्य गृहे दृश्यते यस्यैता उपधीयन्ते य उ चैना एवव्वेदाति-च्छन्दसमुप दधात्यतिच्छन्दा वै सर्वाणि छन्दाꣳसि सर्वैभिरेवैनं छन्दोभिश्चिनुते वर्ष्म वा एषा छन्दसाय्यँदतिच्छन्दा यदतिच्छन्दसमुपदधाति वर्ष्मैवैनꣳ समानानाङ्करोति द्विपदा उप दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ॥ [३७] ॥

(तेज एवपशवः पशवो यजमान एकञ्च) ॥ ८ ॥

सर्वाभ्यो वै देवताभ्योऽग्निश्चीयते यथ् सयुजो नोपदद्ध्याद् देवता अस्याग्निँवृञ्जीरन्यथ् सयुज उपदधात्यात्मनैवैनꣳ सयुजञ्चिनुते नाग्निना व्यृद्ध्यतेऽथो यथा पुरुषः स्नावभिः सन्तत एवमेवैताभिरग्निः सन्ततोऽग्निना वै देवाः सुवर्गँल्लोकमायन् ता अमूः कृत्तिका अभवन्यस्यैता उपधीयन्ते सुवर्गमेव ॥ [३८] ॥ लोकमेति गच्छति प्रकाशञ्चित्रमेव भवति मण्डलेष्टका उप दधातीमे वै लोका मण्डलेष्टका इमे खलु वै लोका देवपुरा देवपुरा एव प्र विशति नाऽऽर्तिमार्च्छ-त्यग्निञ्चिक्यानो विश्वज्योतिष उप दधातीमानेवैताभिर्लोकान् ज्योतिष्मतः कुरुतेऽथो प्राणानेवैता यजमानस्य दाध्रत्येता वै देवताः सुवर्ग्यास्ता एवा न्वारभ्य सुवर्गँल्लोकमेति ॥ [३९] ॥

(सुवर्गमेव ता एव चत्वारि च) ॥ ९ ॥

वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे यदेकधोपदद्ध्यादेकमृतुँवर्षेदनुपरिहारꣳ सादयति तस्माथ् सर्वानृतून्वर्षति पुरोवातसनिरसीत्याहैतद् व वृष्टै रूपꣳ रूपेणैव वृष्टिमव रुन्धे सँय्यानीभिर् वै देवा इमाँल्लोकान्थ् समयुस्तथ् सँय्यानीनाꣳ सँय्यानित्वय्ँयथ् सँय्यानीरुपद-धाति यथाऽप्सु नावा सँय्यात्येव ॥ [४०] ॥ मेवैताभिर् यजमान इमाँल्लोकान्थ् सँय्याति प्लवो वा एषोऽग्नेर् यथ् सँय्यानीर् यथ् सँय्यानीरुपदधाति प्लवमेवैतमग्नय उप दधात्युत यस्यै-तासूपहितास्वापोऽग्निꣳ हरन्त्यहृत एवास्याग्निरादित्येष्टका उप दधात्यादित्या वा एतम्भूत्यै प्रति नुदन्ते योऽलम्भूत्यै सन् भूतिन्न प्राप्नोत्यादित्या ॥ [४१] ॥ एवैनम्भूतिङ्गमयन्त्यसौ वा एतस्याऽऽदित्यो रुचमा दत्ते योऽग्निञ्चित्वा न रोचते यदादित्येष्टका उपदधात्यसावेवास्मिन्ना-दित्यो रुचन्दधाति यथाऽसौ देवानाꣳ रोचत एवमेवैष मनुष्याणाꣳ रोचते घृतेष्टका उप दधा-त्येतद्वा अग्नेः प्रियन्धाम यद्घृतम्प्रियेणैवैनन्धाम्ना समर्द्धयत्य ॥ [४२] ॥ थो तेजसाऽनुपरि-हारꣳ सादयत्यपरिवर्गमेवास्मिन् तेजो दधाति प्रजापतिरग्निमचिनुत स यशसा व्यार्ध्यत स एता यशोदा अपश्यत् ता उपाधत्त ताभिर् वै स यश आत्मन्नधत्त यद्यशोदा उपदधाति यश एव ताभिर् यजमान आत्मन् धत्ते पञ्चोप दधाति पाङ्क्तः पुरुषो यावानेव पुरुषस्तस्मिन्यशो दधाति ॥ [४३] ॥

(एवंप्राप्नोत्यादित्याअर्द्धयत्येकान्न पञ्चाशच्च) ॥ १० ॥

देवासुराः सय्ँयत्ता आसन् कनीयाꣳसो देवा आसन् भूयाꣳसोऽसुरास्ते देवा एता इष्टका अपश्यन् ता उपादधत भूयस्कृदसीत्येव भूयाꣳसोऽभवन् वनस्पतिभिरोषधीभिर् वरिवस्कृद-सीतीमामजयन् प्राच्यसीति प्राचीन्दिशमजयन्नूर्ध्वाऽसीत्यमूमजयन्नन्तरिक्षसदस्यन्तरिक्षे सीदेत्यन्तरिक्षमजयन् ततो देवा अभवन् ॥ [४४] ॥ पराऽसुरा यस्यैता उपधीयन्ते भूया-नेव भवत्यभीमाँल्लोकान् जयति भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यप्सुषदसि श्येनसदसी-त्याहैतद्वा अग्ने रूपꣳ रूपेणैवाग्निमव रुन्धे पृथिव्यास्त्वा द्रविणे सादयामीत्याहेमानेवैताभिर् लोकान् द्रविणावतः कुरुत आयुष्या उप दधात्यायुरेवा ॥ [४५] ॥ स्मिन् दधात्यग्ने यत् ते परꣳ हृन्नामेत्याहैतद् वा अग्नेः प्रियन्धाम प्रियमेवास्य धामोपाऽऽप्नोति तावेहि सꣳ रभावहा इत्याह व्येवैनेन परि धत्ते पाञ्चजन्येष्वप्येद्ध्यग्न इत्याहैष वा अग्निः पाञ्चजन्यो यः पञ्चचिती-कस्तस्मादेवमाहर्तव्या उप दधात्येतद् वा ऋतूनाम्प्रियन्धाम यदृतव्या ऋतूनामेव प्रियन्धामाव रुन्धे सुमेक इत्याह सव्ँवथ्सरो वै सुमेकः सव्ँवथ्सरस्यैव प्रियन्धामोपाऽऽप्नोति ॥ [४६] ॥

(अभवन्नायुरेवर्तव्या उपषड्विꣳशतिश्च) ॥ ११ ॥

प्रजापतेरक्ष्यश्वयत् तत् पराऽपतत् तदश्वोऽभवद्यदश्वयत् तदश्वस्याश्वत्वन्तद्देवा अश्वमेधे-नैव प्रत्यदधुरेष वै प्रजापतिꣳ सर्वङ्करोति योऽश्वमेधेन यजते सर्व एव भवति सर्वस्य वा एषा प्रायश्चित्तिः सर्वस्य भेषजꣳ सर्वव्ँवा एतेन पाप्मानन्देवा अतरन्नपि वा एतेन ब्रह्महत्यामतरन्थ् सर्वम्पाप्मानं ॥ [४७] ॥ तरति तरति ब्रह्महत्याय्ँयोऽश्वमेधेन यजते य उ चैनमेवव्ँवेदोत्तरव्ँवै तत् प्रजापतेरक्ष्यश्वयत् तस्मादश्वस्योत्तरतोऽव द्यन्ति दक्षिणतोऽन्येषाम्पशूनाव्ँवैतसः कटो भवत्यप्सुयोनिर् वा अश्वोऽप्सुजो वेतसः स्व एवैनय्ँयोनौ प्रति ष्ठापयति चतुष्टोमः स्तोमो भवति सरड्ढ वा अश्वस्य सक्थ्याऽवृहत् तद्देवाश्चतुष्टोमेनैव प्रत्यदधुर् यच्चतुष्टोमः स्तोमो भवत्यश्वस्य सर्वत्वाय ॥ [४८] ॥

(सर्वम्पाप्मानं मवृहद् द्वादश च) ॥ १२ ॥

समाप्ति कोर्वैः

(उ॒थ्स॒न्न॒य॒ज्ञ इन्द्रा᳚ग्नी दे॒वा वा अ॑क्ष्णयास्तो॒मीया॑ अ॒ग्नेर्भा॒गो᳚ऽस्यग्ने॑ जा॒तान् र॒श्मिरिति॑ नाक॒सद्भि॒ः छन्दा॑ꣳसि॒ सर्वा᳚भ्यो वृ॒ष्टि॒सनी᳚र् देवासु॒राः कनी॑याꣳसः प्र॒जाप॑ते॒रक्षि॒ द्वाद॑श)

(उ॒थ्स॒न्न॒य॒ज्ञो दे॒वा वै यस्य॒ मुख्य॑वतीर्ना॒कसद्भि॒रे वै ताभि॒र् ष्टाच॑त्वारिꣳशत्)

(उ॒थ्स॒न्न॒य॒ज्ञः स॑र्व॒त्वाय॑)

॥ हरिः ॐ ॥

पञ्चमकाण्डे तृतीयः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
१२	४८

ॐ